# समन्वयाचार्या अभिनवगुप्तपादाः

*--स्नातकतृतीयवर्षीयः शान्तिघोषः*

साहित्यदर्शनयोः समन्वयाचार्यस्य सर्वतन्त्रस्वतन्त्रस्य अभिनवगुप्तपादस्य जन्मस्थानं काश्मीरदेशः। पिता नृसिंहगुप्तः माता च विमलादेवी। पित्रोः त्रिषु अपत्येषु सर्वज्येष्ठः अभिनवगुप्तः। अभिनवगुप्तस्य भ्राता मनोरथः भगिनी च अम्बा। विमलकला इत्येतदपि नाम तन्मातुः। तस्य मातासीत् काचिद् योगिनी। अतः सः योगिनीभूः इति नाम्ना आख्यायते स्म। तस्य पितुः चुक्खल इत्यपि नाम प्रसिद्धम्। ईशवीयनवमदशमशतकं तस्य स्थितिकालः। तस्य कालविषये विप्रतिपत्तिः नास्ति यतो हि निजकृतानां ग्रन्थानां कालं स स्वयमेव उल्लिखति। तथाहि तेन रचितस्य भैरवस्तोत्रस्य कालः ९९३ ईशवीयशतकम्। स्वकृतक्रमस्तोत्रभैरवस्तोत्रयोः अन्ते स लिखति-

**'षड्षष्टिनामके वर्षे नवम्यामसितेऽहनि।**

**मयाऽभिनवगुप्तेन मार्गशीर्षे स्तुतः शिवः।।' इति।**

यत्र परिवारे तस्य जन्म तत्र आसीद्विदुषां समवायः। पिता व्याकरणे न्याये च पारंगमः विद्वान्। पितृव्यः वामनगुप्तः काव्यशास्त्रे लब्धप्रतिष्ठः। पितामहः वराहगुप्तः अपि महान् विद्वान् आसीदिति पूर्वजानां परिचयः तत्कृतेः परात्रिंशिकाविवरणात् ज्ञायते। बाल्ये गुरुगृहगमनं विनैव तस्य शास्त्रज्ञानं सुलभम् आसीत्तथापि पित्रा स विद्याप्राप्तये प्रेषितः। तत्रत्याश्छात्राः तदीयं वैदुष्यं दर्शं दर्शं चकितचकिताः सञ्जाताः। सर्वेऽपि

तत्तोऽबिभ्यन्। बाल्ये गुरुणा स 'बालवलभीभुजङ्गः' इति नाम्ना व्यपदिष्ट इति काव्यप्रकाशीयबालबोधिनीटीकातोऽवगम्यते। शास्त्रभेदेन तस्य भिन्नो भिन्नो गुरुः आसीत्। शैवदर्शनगुरुः आसील्लक्ष्मणगुप्तः। स्वकृतलोचने साहित्यशास्त्रगुरोर्नाम उक्तं भट्टेन्दुराज इति। भट्टेन्दुराजः सरसः कविः आलोचकश्चासीत्। भट्टेन्दुराजस्य पिता भूतिराजः। अभिनवगुप्तस्य ब्रह्मविद्यागुरुः प्रायः स एवासीत्।

अयम् अभिनवगुप्तपादः आसामनिवासिनः शाक्तमतानुयायिनः अभिनवगुप्ताद् भिन्नः। आचार्येण शंकरेण स वादे पराजित आसीदिति अस्योल्लेखो माधवाचार्यविरचिते शङ्करदिग्विजयग्रन्थे समुपलभ्यते। अतः अष्टमशतकीयः स नवमशतकीयात् काश्मीरनिवासिनः शैवमतावलम्बिनः अभिनवगुप्ताद् भिन्नः।

**कृतयः**-विविधविषयेषु अभिनवगुप्ताचार्येण चतुश्चत्वारिंशत्संख्यकाः ग्रन्थाः रचिता आसन्। अनुपलभ्यमानेषु तेषु ग्रन्थेषु एकादश ग्रन्थाः प्रकाशिताः सन्ति। बोधपञ्चदशिका इत्ययं पञ्चदशश्लोकात्मकः शिवभक्तिविषयकः ग्रन्थः। परात्रिंशिकाविवरणम् इति तन्त्रशास्त्रग्रन्थः। मालिनीविजयवार्त्तिकम् इति मालिनीविजयतन्त्रनामकग्रन्थस्य वार्त्तिकम्। तन्त्रालोकः इति तन्त्रशास्त्रस्य विशालकायः ग्रन्थः। काश्मीरीयशैवदर्शनस्य तन्त्रशास्त्रस्य च विश्वकोशः अयं ग्रन्थः। परमार्थसारः इति शैवागमग्रन्थः। अत्र पञ्चाधिकैकशतं श्लोकाः सन्ति। उत्पलाचार्यकृतेश्वरप्रत्यभिज्ञासूत्रोपरि ईश्वरप्रत्यभिज्ञाविमर्शिणी टीका, तन्त्रसारः इति इमे दार्शनिकग्रन्थाः तेन रचिताः।

श्रीमद्भगवद्गीतोपरि भगवद्गीतार्थसंग्रहः इति ग्रन्थः तेन व्यरचि। साहित्यशास्त्रे आनन्दवर्धनाचार्यकृतध्वन्यालोकोपरि लोचनम् इति टीका, काव्यकौतुकम् इति भट्टतौतकृतग्रन्थोपरि विवरणाभिधा टीका अनेन व्यरचि। भरतमुनिकृतनाट्यशास्त्रोपरि अस्य टीका अभिनवभारती।

एतेषु समुपलभ्यमानेषु ग्रन्थेषु ध्वन्यालोकस्य भरतमुनिकृतनाट्यशास्त्रस्य च व्याख्यातृरूपेण सर्वविदितख्यातिः अभिनवगुप्तपादः। एतौ व्याख्याग्रन्थौ एतावन्तौ प्रौढौ, वैदुष्यपूर्णौ, तलस्पर्शिनौ च येन मूलग्रन्थादपि समधिकविख्याताः अस्य टीकाग्रन्थाः। व्याकरणे पतञ्जलिमहर्षेः अद्वैतवेदान्ते च भामतीकारस्य वाचस्पतिमिश्रस्य इव तूल्यं प्रशस्यं स्थानं धत्ते अयम्। वस्तुतस्तु आलंकारिकापेक्षयापि दार्शनिकत्वेन अयं समधिकख्यातः। सः साहित्यशास्त्रम् अलोकसामान्ये दार्शनिकस्तरे प्रतिष्ठापयामास। बाल्ये पित्रोः वियोग एव तस्य दार्शनिकत्वे हेतुः।

न केवलं स आलंकारिको दार्शनिको वा आसीद् अपि तु, सः मत्स्येन्द्रसम्प्रदायस्य सिद्धः तान्त्रिकः उच्चकोटिसाधकश्च आसीत्। आजीवनं सः ब्रह्मचारी आसीत्। काश्मीरकिंवदन्त्यनुसारं तस्य साधनक्षेत्रम् आसीत् श्रीनगरगुलमार्गाभ्यन्तरे मगमनामके स्थाने भैरवगुफा इति। अत्रैव कन्दरे साधनमार्गे स्थितः स दिवं प्राप्तवान् इति लोकश्रुतिरिति शम्।

# तन्त्रालोकदृशाभिनवगुप्तजीवनदर्पणम्

*-- स्नातकद्वितीयवर्षीयः शुभदीपदासः*

**सहजपरामर्शात्मकमहावीर्यशौधधौततनुम्।**

**अभिमतसाधकसाधकमनोऽनुगं तं मनोऽनुगं नौमि।।**

महामाहेश्वरा अत्रिकुलकमलभासकभास्वद्भास्करा योगिनीभुवोऽभिनवगुप्तचार्याः स्वकृतिकिरीटे तन्त्रालोके चरमाह्निके आत्मपरिचयं प्रकाशयामास। प्रसङ्गेऽस्मिन् स्वजनिक्षेत्रं कश्मीरप्रदेशं सप्तलोकललामस्वरूपेण द्वितीयभुवनसमानानन्दागाररूपेण चालिखितं तेन -

**भूरादिसप्तपुरपूर्णतमेऽपि तस्मिन्**

**मन्ये द्वितीयभुवनं भवनं सुखस्य।**

**क्वान्यत्र चित्रगतिसूर्यशशाङ्कशोभि-**

**रात्रिन्दिवप्रसरभोगविभागभूषा।।**

मध्येभारतमन्तर्वेद्याख्ये जनपदेऽत्रिगोत्रोऽत्रिर्नाम विचक्षणो विप्रवर्यो निखिलशास्त्रसुधाकरं पायमगस्त्य इव विरराज। कर्णाकर्णिकया तद्वैचक्षण्यमाकर्णयन् काश्मीराधिपतिर्ललितादित्यो वितस्तायां तस्मै भूमिविशेषं प्रददौ। तस्यैव पवित्रान्वयेऽनुबहुशरदं गगनगङ्गातरङ्गभूषितमूर्धो भगवान् महेश्वरो वराहगुप्तनाम्ना जनिं लेभे। तस्यात्मजो नरसिंहगुप्ताभिधो लोके चुखलखेति प्रसिद्धिं गतः। सर्वशास्त्रपारङ्गतोऽयं

विद्वान् माहेश्वरभक्तितरणिमारुह्य युववयस्येव योगाभ्यासेन वैराग्यपारं सम्प्राप्तः। अनेन वराहगुप्तसुतेन दशमशताब्द्यां विमलायामजायत आचार्यः अभिनवगुप्तः। शैशव एवाचार्यस्य जननी विमला शिववैमल्ये विलीना। किन्तु वियोगोऽयं बाह्यदृष्ट्या दुःखदोऽपि सुखद एवासीदाध्यात्मिकदृष्ट्या। मातृस्नेहरूपपरममायामोचनाच्छैशव एव जीवन्मुक्त्यम्बुधारा तमसिञ्चत् -

**माता परं बन्धुरिति प्रवादः**

**स्नेहोऽतिगाढीकुरुते हि पाशान्।**

**तन्मूलबन्धे गलिते किलास्य**

**मन्ये स्थिता जीवत एव मुक्तिः।।**

पितुः शब्दतर्कादिशास्त्राणि समधिगम्य साहित्यशास्त्राध्ययनेन स महारसज्ञः सम्प्रवृत्तः। किन्तु अकस्मादेव काचिद् दैवशक्तिः लौकिकरसास्वादात् समाकृष्य मातृहीनं युवानं माहेश्वरभक्तिमातुः क्रोडे समस्थापयत्। शिवैकचित्तोऽपि स शैवागममध्येतुमुपगुरु जगाम। अनुजनकं तस्य प्रथमो गुरुः शैवागमार्णवकर्णधार आचार्यवामनाथः। तदनु स शम्भुनाथभट्टेन्दुराजप्रभृतीनां सन्निधिं सम्प्राप्य निगमाभ्यासं व्यधात् येन पण्डितबीजोऽयमुपदेशवारिणा बहुशाखापल्लवितः समभूत्।

अप्रतिमप्रतिभया सर्वशास्त्रविचक्षण आचार्यो विद्याभ्यासं विधायैव न निरतः, अपि तु विद्यावितरणे मुक्तहस्तः प्रावर्तत। सर्वप्रथमं स निजानुजं मनोरथगुप्तं शैवागममुपदिदेश।

तदीयविद्वत्तां निशम्य श्रीशौरिसुतकर्णमन्त्रिपुत्रश्रीमन्द्रक्षेमेन्द्रादयोऽनेके शिष्याः तत्सकाशात् लब्धशास्त्रधियः परवर्तिनि काले महत्पदवीं प्रापुः। भक्तान्यतमेन मन्द्रेणानुरुद्ध आचार्यो महेश्वरपीठभूमौ भुवननाके श्रीप्रवरे स्थित्वाध्यापनायां निरतो बभूव।

आचार्यशिष्यः शैवागमनिष्णातः कर्णः यौवन एव योगबलेन स्वदेहं त्याजं शिवलोकं जगाम। तदनु कर्णपत्नी अम्बा तुरीयाश्रमं स्वीकृत्याजीवनावसानमतिष्ठत्। अस्या अम्बायाः दीक्षागुरुरभिनवाभिधो निजाग्रजः। अयमपि अभिनवः अभिनवाचार्यादेवाभिनवोपायेन शैवागममध्यैत।

भक्तमन्द्रस्य पितृव्यपत्नी वत्सलिका श्रीप्रवरे आचार्याय गृहाद्यनेकानर्घ्यवस्तूनि प्रादात्। आचार्येण तत्रैव स्थित्वा गुरुकुलाधिगतशैवागमतत्त्वार्थं स्मारं स्मारं शिवानुग्रहेण तन्त्रालोकग्रन्थो व्यरचि यस्य भासा भास्वन्तो योगिनः स्वाभीप्सितमार्गे यथेच्छं प्रवेशं प्राप्नुवन्ति। वर्णितं तदाचार्येण ग्रन्थमालायाः अन्तिमे पद्यकुसुमे -

**इदमभिनवगुप्तप्रोम्भितं शास्त्रसारं**

**शिव निशमय तावत्सर्वतः श्रोत्रतन्त्रः।**

**तव किल नुतिरेषा सा हि तद्रूपचर्चे-**

**त्यभिनवपरितुष्टो लोकमात्मीकुरुष्व।।**

# लोचनकारः अभिनवगुप्तः

*--स्नातकतृतीयवर्षीय उत्तमघोषः*

काश्मीरकवीनां मध्ये अन्यतमाः विद्वन्मूर्धन्या आसन् आचार्याः अभिनवगुप्तपादाः। स एकाधारे एव दार्शनिकः, आलङ्कारिकः सङ्गीतज्ञः नाट्यकारः वेदान्तज्ञः च आसीत्। तस्य व्याख्यानम् एवं वैदुष्यपूर्णं तलस्पर्शि च अस्ति यद् क्वचित् मूलग्रन्थापेक्षया तस्य व्याख्यानमेव अधीकरूपेण समादृतं भवति।

तन्त्रालोकादिषु स्वकृतिषु स स्वपरिचयं सम्यक् विन्यस्तवान्। तस्य जीवनकालः पञ्चाशदधिकनवशततमेशाब्दात्(९५०) विंशत्यधिकैकसहस्रतमेशाब्दपर्यन्तम् असीदिति विद्वद्भिः मतैक्यं पोषितम्। तस्य पिता आसीत् नृसिंहगुप्तः माता च विमलादेवी इति। अभिनगुप्तस्य एकः मनोरथनामा भ्राता अम्बानाम्नी एका भगिनी चासीत्। तस्य पितृव्य आसीद् वामनगुप्तः। अभिनवगुप्तस्य माता विमला "विमलकला" इत्यपि उच्यते स्म। विमलकला च काचिद् योगिनी आसीद् अतः अभिनवगुप्तः "योगिनीभूः" इति नाम्ना अपि प्रसिद्धः।

तस्य शैशवे एव तत्पितरौ दिवङ्गतौ तथापि परमसाधकः अयं स्वप्रयासेन परं महान् दार्शनिकः सञ्जातः। काश्मीरकथानुसारं श्रीनगर-गुल्ममर्गस्थानयोर्मध्ये मगमस्थानस्य समीपे भैरवनामकगुहायां स तपश्चरति स्म। तत्रैव सोऽन्तिमश्वासमपि त्यक्तवान् इति केचित्।

अस्य कवेः पूर्वजाः काश्मीरप्रदेशीयाः नासन्। अभिनवगुप्तस्य जन्मनः द्विशतवर्षेभ्यः पूर्वमेव ते कन्नौज-स्थानात् काश्मीरप्रदेशम् आगतवन्तः। काश्मीरनरेशः विद्वत्प्रेमी ललितादित्य एव तत्पूर्वजान् अत्रेयादीन् ससम्मानं काश्मीरमानीतवान्, तत आरभ्य ते काश्मीरप्रदेशे एव वासं चक्रुः-

बाल्यकाले एष अभिनवगुप्तः पाठशालां न गतवान्। स्वगृहे एव विद्याभासमकरोत्। तस्य पिता नृसिंहगुप्तः संस्कृतव्याकरणस्य तर्कशास्त्रस्य च विद्वान् आसीद्, तस्य पितृव्यश्च काव्यशास्त्रस्य विद्वान् आसीद् अतः ताभ्यामेव अभिनवगुप्तः तत्तच्छास्त्रज्ञानमर्जितवान्। परन्तु उत्तरकाले स बहूनि शास्त्राणि अधीत्य बहुषु विषयेषु पारङ्गत आसीत्। तस्य बहवो गुरव आसन्। अतः ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शन्यां तेनोक्तम्- **"नानागुरुप्रवरपादनिपातजातसंवत्सरीरुहविकासनिवेशितश्रीः"**इति। ध्वनिसिद्धान्ते तस्य गुरुरासीत् भट्टेन्दुराजः, अतः लोचने स बहुवारं तन्नाम उल्लिखति- **"यथा वा अस्मदुपाध्ययस्य विद्वत्कविसहृदयचक्रवर्तिनो भट्टेन्दुराजस्य"** इति। द्वैतवादिशैवसम्प्रदायस्य गुरुरासीद् भूतिराजतनयः। नाट्यशास्त्रस्य गुरुरासीद् भट्टतौतः, अतः अभिनवभारत्याः अन्तिमे स कथयति-

**"द्विजवरतोतनिरूपितसन्ध्यध्यायार्थतत्त्वघटनेयम्।**

**अभिनवगुप्तेन कृता शिवचरणाम्भोजमधुपेन।।"**

--(अभिनवभारत्याः अन्ते)

अभिनवगुप्तस्य प्रायेण चतुश्चत्वारिंशत् कृतयः सन्ति। तासु अधिकाः लुप्ताः। तत्कृतयः चतुर्धा विभज्यन्ते- १)काव्यशास्त्रीयकृतिः २)स्तोत्रम् ३)तन्त्रम् ४)प्रत्यभिज्ञादर्शनम् इति। यद्यपि स स्वतन्त्ररुपेण काव्यशास्त्रं न रचितवान् तथापि काव्यानामुपरि वैदुष्यपूर्णटीकाः रचितवान्। काव्यशास्त्रीयकृतिषु यथा ध्वन्यालोकस्य लोचनम् इति। अत्र ध्वनीनां तथा रसानां निष्पत्तिविषये विशेषेण आलोचना तथा ध्वनिविरोधिमतानां दृढतापूर्वकं खण्डनमपि दृश्यते। एवमेव भरतमुनेः नाट्यशास्त्रस्य उपरि अभिनवभारतीनाम्नी टीकापि तेन रचिता। अत्र भारतीयनाट्यकलानां सम्यक् विवरणं प्राप्यते। एवं भट्टतौतकृत-काव्यकौतुकस्य विवरणनामिका टीकापि तेन रचिता, परन्तु तदद्य न प्राप्यते। तेन बहूनि क्षुद्राणि वृहदाकारकाणि स्तोत्राण्यपि रचितानि- यथा भैरवस्तोत्रम्, क्रमस्तोत्रम्,देहस्थदेवताचक्रस्तोत्रम्, अनुभवनिवेदनस्तोत्रम्, क्रमकेलिस्तोत्रम्, बोधपञ्चाशिका, पूर्वपञ्चाशिका इत्यादीनि। तन्त्रशास्त्रे तस्य सर्वाधिकप्रसिद्धा कृतिरस्ति तन्त्रालोक इति। प्रत्यभिज्ञादिविचारधाराणां विस्तारपूर्वकमत्र व्याख्या प्राप्यते। अयमेव शैवशास्त्रस्य सर्वाधिकप्रामाणिकग्रन्थः। एतासु कृतिषु तन्त्रालोकः अभिनवभारती लोचनञ्च समधिकप्रसिद्धम्। लोचनस्य अन्वर्थनामविषये तेन भणितम्-

**"किं लोचनं विनाऽलोको भाति चन्द्रिकयोऽपि हि।**

**तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यघात् ।।"**

## महामहामाहेश्वराः अभिनवगुप्तपादाः

*--स्नातकद्वतीयवर्षीयः तापसखाँरा*

"अजयत् किल शाक्तभाष्यकारं स च भग्नो मनसेदमालुलोपे" इति शाङ्करदिग्विजयग्रन्थोक्तः शङ्करपराजितः अभिनवगुप्तः अस्माभिरिदानीं प्रतिपाद्यमानोऽभिनवगुप्तश्च नाभिन्नः। अस्मत्प्रतिपाद्य आचार्याभिनवगुप्तस्तु(९५०-१०२५खी.) काश्मीरनिवासी न हि कामरूपनिवासी। आचार्यस्य अभिनवगुप्तेति नामधेयमिदं गुरुप्रदत्तमिति तन्त्रालोके स्वयमुक्तं तेन – "अभिनवगुप्तस्य कृतिः सेयं यस्योदिता गुरुभिराख्या" इति।

अभिनवगुप्ताचार्यः नानाचार्येभ्यः प्राप्तनानाज्ञानवैभवः तत्तदाचार्यान् सातिशयं सश्रद्धं च सस्मार स्वीयग्रन्थेषु। तथाहि गुप्ताचार्यो विद्वत्कविसहृयचक्रवर्तिनः काव्यशास्त्रीयगुरोः भट्टेन्दुराजस्य सादरं स्मरणं व्यधात् तत्प्राप्तविचाराश्रयेण विरचिते लोचने। किञ्च, नाट्यशास्त्रीयगुरोः भट्टतोतस्य समादरः अभिनवगुप्ताचार्येण कृतः भट्टतौतविरचितकाव्यकौतुकग्रन्थावलम्बनभूते स्वरचितविवरणाख्यव्याख्याने ---

"स चायमस्मदुपाध्यायभट्टतौतेन काव्यकौतुके, तद्विवरणे बहुतत्कृतनिर्णयपूर्वपक्षसिद्धान्त इत्यलं बहुना" इति। अपि च, अभिनवभारत्यां गुप्ताचार्यस्य स्ववचनम् ---

**"द्विजवरतोतनिरूपितसन्ध्यध्यायादतत्त्वधारणेयम्।**

**अभिनवगुप्तेन कृता शिवचरणाम्भोजमधुपेन।।"इति।**

एकादशेशवीयाब्दारम्भभागे श्रीनगरवासकाले न्यायादिसकलशास्त्रेषु अनन्यश्चासौ सुपण्डितः बहुग्रन्थान् प्रणिनाय, येषु प्रत्यभिज्ञादर्शनोपरि समधिका ग्रन्थाः प्राप्यन्ते। तद्विरचितग्रन्थेषु भाषायां प्रासादगुणसहितम् ओजोगुणमिश्रणम्, शैल्यां च न्यायशास्त्रवत् स्वल्पाक्षरत्वं संहतत्वं च संलक्ष्यते।

परमार्थसारः, तन्त्रालोकः, तन्त्रसारः इत्यादिषु सत्सु अपि तदीयग्रन्थराजिषु ध्वन्यालोकलोचनं तथा अभिनवभारती चेति टीकाद्वयं विदुषां सुवेद्यमेव।

पण्डितमुकुन्दरामशास्त्रिणो लेखविशेषात् ज्ञायते यत् गुप्तपादेन श्रीमद्भगवद्गीतायाः अलंकारग्रन्थानां च विरचिताः टीकाग्रन्थाः सर्वोत्कृष्टत्वेन समाद्रियन्ते पण्डितप्रकाण्डेषु इति। तत्र पुनः रससूत्रव्याख्यायां गुप्तपादेन सिद्धान्तितम् अभिव्यक्तिवादम् अद्यावधि स्वमतेन न कोऽपि अतिशेते। रससिद्धान्तप्रवर्तकस्यास्य आचार्यस्य विषये वाग्देवतावतारः काव्यप्रकाशकारः लिखति "श्रीमदाचार्याभिनवगुप्तपादाः" इति गौरवसूचकं वाक्यम्।

काश्मीरकथानुसारेण आबालात् मातृपितृवियोगेनाप्तकष्टः नीरसजीवनेन च खिन्नोऽभिनवगुप्तः दार्शनिकः समभूत्। साधकत्वेन बहुमान्योऽसौ श्रीनगरस्थलात् पञ्चक्रोशपरिमितभैरवगुहायामेव उपासनं चकार, तत्रैव च स्वप्राणान् अत्यजत् इति श्रूयते।।

**सम्पादकस्य--** काश्मीरनिवासी आचार्यः अभिनवगुप्त एकाधारे एव दार्शनिक आलंकारिक तन्त्रज्ञश्च आसीत्। तस्य जीवनकालः पञ्चाशदधिकनवशततमेशाब्दात्(९५०) विंशत्यधिकैकसहस्रतमेशाब्दपर्यन्तम् (१०२०)असीदिति सर्वैरपि विद्वद्भिरङ्गीकृतम्। तस्य पिता आसीत् नृसिंहगुप्तः माता च विमलादेवी इति। तस्य व्याख्यानम् एवं वैदुष्यपूर्णं तलस्पर्शि च अस्ति यद् क्वचित् मूलग्रन्थापेक्षया तस्य व्याख्यानमेव अधिकरूपेण समादृतं भवति। शास्त्रभेदेन तस्य भिन्नो भिन्नो गुरुः आसीत्। शैवदर्शनगुरुः आसील्लक्ष्मणगुप्तः। स्वकृतलोचने साहित्यशास्त्रगुरोर्नाम उक्तं भट्टेन्दुराज इति। द्वैतवादिशैवसम्प्रदायस्य गुरुरासीद् भूतिराजतनयः। नाट्यशास्त्रस्य गुरुरासीद् भट्टतौतः।अभिनवगुप्तस्य प्रायेण चतुश्चत्वारिंशत् कृतयः सन्ति। तासु अधिकाः लुप्ताः। काव्यशास्त्रीयकृतिषु ध्वन्यालोकस्य लोचनटीका अतीव सुप्रसिद्धा । एतादृशः सर्वशास्त्रज्ञ आाचार्योऽभिनवगुप्तपाद इति विषयमाधारीकृत्य इदं निवेदनम् अस्माभिः विहितम्। तदिदं सर्वेषां मनोमुकुरे आह्लादकारणं भवतु इत्याशा।।

**उद्घाटकः-**

**निर्देशकः-** विद्वान् वेङ्कटरमणभट्टः, प्राध्यापकः संस्कृतविभागस्य।

**सम्पादकः-** पङ्कजराउलः, स्नातकोत्तरद्वितीयवर्षीयः।

**आलंकारिकः-** सोमनाथवर्मणः, स्नातकप्रथमवर्षीयः।

**वर्षम्- ४** **अङ्कः-१३ (अभिनवगुप्तपादः)**

प्रकाशनदिनाङ्कः- /०४/२०१८ वासरः-